एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम् ।
अन्यो हि नेदुदुपधः कृत्वोऽर्थः कश्चिदप्यस्ति ॥

अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत ।
चतुरो न सिध्यति तदा रेफस्य विसर्जनीयो हि ॥

तस्मिंस्तु क्रियमाणे युक्तं चतुरो विशेषणं [1]भवति ।
प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम् ॥ (म. भा. ३. ४३५)

एवं तु क्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे चतुःशब्दस्य कृत्वोऽर्थेऽपि वर्तमानस्य पूर्वेणैव[2] नित्यं षत्वं स्यात् । 'पूर्वत्रासिद्धे नास्ति [3]विप्रतिषेधोऽभावादुत्तरस्य[4]' (जै. प. ६७) ॥

## इसुसोः सामर्थ्ये । (४४/१५८)

[5]षः इति सम्बध्यते । इस् उस् इत्येतयोः विसर्जनीयस्य अन्यतरस्यां षकारादेशो भवति सामर्थ्ये[6] कुप्वोः परतः । सर्पिष्करोति, सर्पिः करोति । यजुष्करोति, यजुः करोति[7] । सामर्थ्ये इति किम् ? तिष्ठतु सर्पिः, पिब त्वमुदकम् । सामर्थ्यम् इह व्यपेक्षा, न पुनरेकार्थीभावः, उभयं [8]वा ॥

## नित्यं समासेऽनुत्तरपदस्थस्य । (४५/१५९)

[9]इसुसोः इति वर्तते । [10]समासविषये इसुसोः विसर्जनीयस्य अनुत्तरपदस्थस्य नित्यं [11]षत्वं भवति कुप्वोः परतः । सर्पिष्कुण्डिका । [12]धनुष्कपालम् । [13]सर्पिष्पानम् । धनुष्फलम् । अनुत्तरपदस्थस्य इति किम् ? परमसर्पिःकुण्डिका (म. भा. ३. ४३५) । [14]परमधनुःकपालम् । [15]पूर्वसूत्रेण विकल्पोऽप्यत्र न भवति । एतदेव अनुत्तरपदस्थस्य इति वचनं[16] ज्ञापकम् इसुसोः 'प्रत्ययग्रहणे यस्मात् स विहितः [17]तदादेः' (पु. प. २४) इत्ययं नियमो [18]न भवति । तेन वाक्ये[19]ऽपि परमसर्पिष्करोति, परमसर्पिः करोति, '[20]इसुसोः सामर्थ्ये' (८. ३. ४४/१५८) इत्येतद् भवति । व्यपेक्षा [21] च तत्र सामर्थ्यमाश्रितम् इति [22]समासे न भवति ॥

---

1. भवितुम् क. 2. एव नास्ति ब. क. 3. प्रतिषेधः ड. 4. इति इत्यधिकम् ब. 5. वाक्यमिदं नास्ति ह. ब. 6. सति इत्यधिकम् क. इ. 7. सर्पिष्पिबति सर्पिः पिबति इत्यधिकन् ब. 8. वा नास्ति इ. 9. वाक्यमिदं नास्ति इ. ड. ह. 10. समासे इ. ह. 11. षकारादेशः क. इ. ड. 12. चतुष्कपालम् इ, यजुष्कपालम् बहिष्कुलम् ह. 13. सर्पिष्फलम् ड. 14. परमधनुःकपालम् नास्ति क. ड. ह. 15. पूर्वसूत्रविकल्पः क, वाक्यमिदं नास्ति इ. ह. 16. एव इत्यधिकम् ब. 17. तदन्तस्य ग्रहणं क. ब, तदादिः इ. 18. न नास्ति ब. क. 19. अपि नास्ति इ. 20. इति इत्यधिकम् इ. 21. यत्तत्र इ. 22. समासो इ.